# Shri NatarajahridayabhAvana Saptakam

# શ્રીનટરાજહૃદયભાવનાસપ્તકમ્

## Document Information

Text title : naTarAjahRRidayabhAvanAsaptakam

File name : naTarAjahRRidayabhAvanAsaptakam.itx

Category : saptaka, shiva

Location : doc_shiva

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan, PSA Easwaran

Description-comments : Natarajastavamanjari print page 101

Latest update : November 6, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીનટરાજહૃદયભાવનાસપ્તકમ્

ૐ શ્રીગણેશાય નમઃ ।

કામશાસનમાશ્રિતાર્તિનિવારણૈકધુરન્ધરં
પાકશાસનપૂર્વલેખગણૈઃ સમર્ચિતપાદુકમ્ ।
વ્યાઘ્રપાદફણીશ્વરાદિમુનીશસંઘનિષેવિતં
ચિત્સભેશમહર્નિશં હૃદિ ભાવયામિ કૃપાકરમ્ ॥ ૧॥

યક્ષરાક્ષસદાનવોરગકિન્નરાદિભિરન્વહં
ભક્તિપૂર્વકમત્યુદારસુગીતવૈભવશાલિનમ્ ।
ચણ્ડિકામુખપદ્મવારિજબાન્ધવં વિભુમવ્યયં
ચિત્સભેશમહર્નિશં હૃદિ ભાવયામિ કૃપાકરમ્ ॥ ૨॥

કાલપાશનિપીડિતં મુનિબાલકં સ્વપદાર્ચકં
હ્યગ્રગણ્યમશેષભક્તજનૌઘકસ્ય સદીડિતમ્ ।
રક્ષિતું સહસાવતીર્ય જઘાન યચ્છમનં ચ તં
ચિત્સભેશમહર્નિશં હૃદિ ભાવયામિ કૃપાકરમ્ ॥ ૩॥

ભીકરોદકપૂરકૈર્ભુવમર્ણવીકરણોદ્યતાં
સ્વર્ધુનીમભિમાનિનીમતિદુશ્ચરેણ સમાધિના ।
તોષિતસ્તુ ભગીરથેન દધાર યો શિરસા ચ તં
ચિત્સભેશમહર્નિશં હૃદિ ભાવયામિ કૃપાકરમ્ ॥ ૪॥

યોગિનઃ સનકાદયો મુનિપુંગવા વિમલાશયાઃ
દક્ષિણાભિમુખં ગુરું સમુપાસ્ય યં શિવમાદરત્ ।
સિદ્ધિમાપુરનૂપમાંતમનન્યભાવયુતસ્ત્વહં
ચિત્સભેશમહર્નિશં હૃદિ ભાવયામિ કૃપાકરમ્ ॥ ૫॥

ક્ષીરસાગરમન્થનોદ્ભવકાલકૂટમહાવિષં
નિગ્રહીતુમશક્યમન્યસુરાસુરૈરપિબોઽર્થિતઃ ।

રક્ષતિ સ્મ જગત્ત્રયં સવિલાસમેવ નિપીય તં
ચિત્સભેશમહર્નિશં હૃદિ ભાવયામિ કૃપાકરમ્ ॥ ૬॥

સર્વદેવમયં યમેવ ભજન્તિ વૈદિકસત્તમાઃ
જ્ઞાનકર્મવિબોધકાઃ સકલાગમાઃ શ્રુતિપૂર્વકાઃ ।
આહુરેવ યમીશમાદરતશ્ચ તં સકલેશ્વરં
ચિત્સભેશમહર્નિશં હૃદિ ભાવયામિ કૃપાકરમ્ ॥ ૭॥

॥ ઇતિ શિવમ્ ॥

Encoded by Sivakumar Thyagarajan shivakumar24 at gmail.com
Proofread by Sivakumar Thyagarajan, PSA Easwaran

*Shri NatarajahridayabhAvana Saptakam*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*